रविहिते सन्ध्यायां शिवाभ्यो देये मांसादिबलौ तद्वि-
धिस्तन्त्रसारे द्रष्टव्यः ।

**शिवाराति** पुं०शिवायाः शृगाल्या अरातिः । १कुक्कुरे शब्दमा० २शिवाशिवयोर्द्वेष्टरि पापरड्डे च ।

**शिवारुत** न० ६त० । शृगालीशब्दे दिग्भेदे तस्य शुभाशुभ-
फलं वसन्तराजशाकुने उक्तं यथा

"शोभनं शुभफलाप्तिसूचकं कथ्यते त्ववितथं शिवारुतम् । शान्तदीप्तककुभां विशेषतो ज्ञानमत्र च सदापयुज्यते । दग्धा दिगुक्ता दिननाथयुक्ता विवस्वतामा भवति प्रदीप्ता । सा धूमिता यां सविता प्रयातः शेषा दिगन्ताः किल पञ्च शान्ताः । दग्धा दिगैशी ज्वलिता दिगैन्द्री प्रधूमिता चानलदिक्क्रमेण । आद्ये दिनस्य प्रहरे प्रवृत्ते महेश-देवेशहुताशदिक्षु । शिवा रटन्ती कुरुते नराणां संता-सकायव्ययबन्धनानि । अह्नो द्वितीये प्रहरस्य भागे महेन्द्रवैश्वानरकालदिक्षु । शिवा रटन्ती कुरुते इत्यादि । अह्नस्तृतीये प्रहरे दिनस्य हुताशवैवस्वतयातुदिक्षु । शिवा रटन्ती कुरुते इत्यादि । समागतेऽह्नः प्रहरे तुरीये प्रेतेशरक्षःपतिपाशिदिक्षु । शिवा रटन्ती कुरुते इत्यादि । आद्ये निशायाः प्रहरे प्रवृत्ते रक्षोऽधियादः-पतिवातदिक्षु । शिवा रटन्ती कुरुते इत्यादि । ततो द्वितीयप्रहरे रजन्यास्तोयाधिनाथानिलसोमदिक्षु । शिवा रटन्ती कुरुते इत्यादि । यामेस्तृतीयेऽपि च यामवत्याः समीरदोषाकरशम्भुदिक्षु । शिवा रटन्ती कुरुते इत्यादि । समागते रात्रितुरीययामे निशाकरेशानसुरेशदिक्षु । शिवा रटन्ती कुरुते इत्यादि । इतीरितं दिक्त्रय-यामयोगात् फलं विरुद्धं विरुतैः शिवायाः । अतो-ऽथ दिक्पञ्चकयामयोगात् फलानि पुंसां क्रमतः शु-भानि । कृतान्तरक्षोवरुणानिलेन्दुदिक्ष्वाद्ययामे रवितैः शृगाल्याः । स्यादिष्टवार्त्ताश्रुतिरिष्टसिद्धिर्लाभः सु-भिक्षं प्रियलोकसङ्गः । रक्षःप्रचेतोऽनिलसोमशम्भुदिक्षु द्वितीये प्रहरे रुतेन । स्यादिष्टवार्त्ताश्रुतिरित्यादि । जलेशवातेन्दुशिवामरेशदिक्ष्वारवेण प्रहरे तृतीये । स्यादिष्टवार्त्ताश्रुतिरित्यादि । समीरसोमेशहरेशवह्निदिक्षु स्वरेण प्रहरे चतुर्थे । स्यादिष्टवार्त्ताश्रुतिरित्यादि । शशा-ङ्करुद्रेन्द्रहुताशकालदिक्ष्वारवैः पञ्चमयामभागे । स्यादि-ष्टवार्त्ताश्रुतिरित्यादि । ईशानशक्राग्निकृतान्तरक्षोदिक्षु स्वरेण प्रहरे च षष्ठे । स्यादिष्टवार्त्ताश्रुतिरित्यादि । इन्द्राग्निकालासुरपाशपाणिदिक्ष्वारवैः सप्तमयामकाले । स्यादिष्टवार्त्ताश्रुतिरित्यादि । अत्यन्तवह्नैकृतपाशिशात-दिक्ष्वष्टमे च प्रहरे रवेण । स्यादिष्टवार्त्ताश्रुतिरित्यादि । "एकादिकानां निधनाष्टमानां शिवारुतानामधुना यदर्थम् । प्राच्यादिकास्वष्टसु दिक्षु शेषं यद्यत् फलं तत्तदुदीरयामः । धनान्यभीष्टाप्तिमभीष्टलाभं ध्रुवं ततोऽर्थस्य फलं शुभञ्च । भयं प्रतापं सकलञ्च सौ-ख्यमेकादिशब्दैः कुरुते प्रशान्ते । भयान्यनिष्टश्रुति-रर्थहानिरिष्टैर्वियोगो महती च भीतिः । स्याद्वि-ग्रहाप्तिर्मरणञ्च दीप्ते त्वेकादिना चेत् क्रतसप्तकेन । ऐशन्यां निनादे प्रथमेऽर्थलाभो भवेद्द्वितीये निधिदर्शनञ्च । कन्यां तृतीये लभते चतुर्थे त्वध्वागमं पञ्चमकेऽथ सि-द्धिम् । षष्ठे रवे कुप्यति भूमिनाथो भीः सप्तमे स्याद्विफ-लोऽष्टयस्तु । नाशोऽग्निभागे प्रथमे द्वितीये नराधिपः कुप्यति भीस्तृतीये । घातश्चतुर्थे नगरस्य शब्दे शिवा-कृते पञ्चमके च युद्धम् । वदन्ति तज्ज्ञाः कलहञ्च षष्ठे भीः सप्तमे स्याद्विफलोऽष्टमस्तु । आद्ये शुभं स्यादशुभं द्वितीये याम्ये महाव्याधिभयं तृतीये । स्वरे चतुर्थे स्व-जनागमः स्यात् पुत्रो भवेत् पञ्चम फेरुकृतेषु । जायेत कन्या रटिते च षष्ठे भीः सप्तमे स्याद्विफलोऽष्टमस्तु । ग्रामस्य घातो दिशि राक्षसानामाद्ये द्वितीयेऽपि च गोकुलस्य । मृत्युस्तृतीये द्विचतुष्पदानां हानिश्चतुर्थे-ऽपि च पञ्चमेऽत्र । चौराद्भयं राजभयञ्च षष्ठे भीः सप्तमे स्याद्विफलोऽष्टमस्तु । शब्दे शिवाया वरुणस्य भागे आद्ये भयं हानिरथ द्वितीये । स्याद्राजदूतागमनं तृतीये वादश्चतुर्थे खलु चौरभीतिः । स्यात् पञ्चमे राजभयञ्च षष्ठे भीः सप्तमे स्याद्विफलोऽष्टमस्तु । वायव्यभागे भय-मेकशब्दे भयातिरेको भवति द्वितीये । वृष्टिस्तृतीये महती चतुर्थे मेघागमे वर्षति पञ्चमे च । क्रोधं वि-धत्ते नृपतेश्च षष्ठे भीः सप्तमे स्याद्विफलोऽष्टमस्तु । दिश्युत्तरस्यां विहिते विरावे म्रियेत कश्चित् प्रथमे द्वि-तीये । महाभयं, विप्रवधस्तृतीये चात्रं चतुर्थे खलु हन्यते च । विट् पञ्चमे षष्ठरवे च शूद्रा भीः सप्तमे स्या-द्विफलोऽष्टमस्तु । राहोस्तथा दर्शनमाद्यशब्दे केतो-र्द्वितीये च तथोत्तरेण । उल्काप्रपातस्त्रिषु दुर्दिनञ्च चतुर्थे भद्रं खलु पञ्चमे च । सङ्गो भवेद्वैरिजनैश्च षष्ठे भीः सप्तमे स्याद्विफलोऽष्टमस्तु । आद्ये भवेद्दुर्दि-नमीशदेशे वृष्टिर्द्वितीये च रवे शिवायाः । वातस्तृतीये त्वग्निश्चतुर्थे म्रियेत कश्चित् खलु पञ्चमे च । लभेत